# स्नेहबन्धनम्

(रूपकम्)

ओगेटि अच्युतराम शास्त्री

दि संस्कृत थियेटर्, हैदराबाद्

श्रीनटराजाय नमः

# स्नेहबन्धनम्

[ एकाङ्कं सामाजिकं संस्कृतरूपकम् ]

माननीयाध्यक्षः
डा. रमाकान्त शुक्ल महाभागेभ्यः
सादरं समर्पितम्।
ओगेटि अच्युतरामशास्त्री
7-11-1987

रचयिता

संस्कृत नाटक प्रयोगोद्धारकः

ओगेटि अच्युतराम शास्त्री

एम. ए., भाषाप्रवीणः

दि संस्कृत थियेटर्, हैदराबाद्

आन्ध्रप्रदेश्

प्रथममुद्रणम्
500 प्रतिकृतयः

प्रकाशनम्
विजयदशमी
11 अक्टोबर् 1978

प्राप्तिस्थलम्
ओगेटि अच्युतरामशास्त्री
दि संस्कृत थियेटर्
8–2–46, पञ्जगुट्टा (प्रतापनगर्)
हैदराबाद्–500 004
आन्ध्रप्रदेश्

मूल्यम्
रूप्यकद्वयम्

सर्वाधिकाराः स्वायत्ताः

दक्षिण भारत प्रेस्
खैरताबाद्
हैदराबाद्-500 024
आन्ध्रप्रदेश्

# आशीः प्रसादः

## जीयादच्युतरामः

दृढभक्तिः नाटचरङ्गक्षेत्रे संस्कृतरञ्जिते ।
जीयादच्युतरामोऽसौ अच्युतः संस्कृतात्पथः ।।

संस्कृतस्य प्रचारेण भावितात्मा दिनाद्दिनम् ।
जीयादच्युतरामोऽसौ गुर्वनुग्रहसंस्कृतः ।।

स्थिरलक्ष्यः सिद्धसंपत् स्थिरधैर्यः स्थिरागमः ।
जीयादच्युतरामोऽसौ नटराजप्रसादतः ।।

स्वयमुद्दीपितः कार्ये स्वयंकृषिविभूषितः ।
ओगेटचच्युतरामोऽसौ भविता च स्वयंप्रभः ।।

हरिसोदरवात्सल्यात् हरेश्च कृपया सदा ।
नित्योत्साही विजयताम् अच्युतः सार्थनामकः ।।

शोधन् पैण्ट्स्, हैदराबाद्
1-10-49, बेगम्पेट्
हैदराबाद्-16

सदा वत्सस्य क्षेमाभिलाषी
हरि लक्ष्मीनरसिंहशर्मा
(हरिसोदरः)

—०—

## मम अनुजः

अनुजः पण्डितश्चैव व्यवहारेषु कौशलः ।
वक्तृता धारणशीलोऽयम् अच्युताभिज्ञसज्जितः ॥

कर्मशीलश्च मेधावी देशभक्तः सदाश्रयः ।
आदर्शजीवनासक्तः संस्कृतान्ध्राभिभूषितः ॥

देवभाषाप्रचाराय नाट्यरूपेण जीवितम् ।
मुदाङ्कितं विधायासौ मनुते धन्यमात्मनि ॥

ओगेटि परीक्षित् शर्मा
भाषाधिकारी (तेलुगु)
भाषासंचालनालयः
विभागीयकार्यालयः
पूना-४११०२२

मध्यप्रदेशसाहित्यपरिषदः
अखिल भारतीय कालिदासपुरस्कारभाजः
पं. श्री ओगेटि परीक्षितशर्मणः
यशोधरामहाकाव्यात्
उद्धृताः

# प्रस्तुतिः

श्री ओगेटि अच्युतरामशास्त्रिणः न केवलं नटवराः अपितु रूपककृतोऽपि ।

"स्नेहबन्धनस्य" वस्तु परिमाणतो लघु अपि रामणीयकेन गुरु वर्तते । पञ्चसु प्रेक्षणकेषु निबद्धे अस्मिन् दृश्यकाव्ये गोपिरेड्डिः, लिङ्गमूर्तिः, रामनाथः, माधवशर्मा इति चत्वारि पात्राण्येव रङ्गे लोचनगोचराणि भवन्ति । कथायाः नायकः कामराजस्तु केवलं श्रुतिपथमेवारोहति ।

अस्मिंश्च रूपके पात्राणि सूक्ष्मया, हृदयङ्गमया, असंदिग्धया, स्फुटया रीत्या आलिखितानि । पात्राणां परस्परभिन्नाः स्वरूप-स्वभावप्रवृत्तयोऽपि निपुणं निरूपिताः ।

कामराजः "प्रकृत्या सानुक्रोशः, सर्वथा परोपकाराय संकल्पते च (पृ-७) । स च 'यथाशक्ति उपकारं करोति; न पुनः हस्तं प्रसारयति कस्यचिदपि संमुखे" (पृ-८) । नूनम् "आश्चर्यकारिणी तस्य प्रवृत्तिः" (पृ-९) । प्रतिकूला-स्वपि आर्थिकादिषु परिस्थितिषु स न विचलति; परोपकारं

तन्वान एवास्ते । किं बहुना-भगवद्गीतायां यदाम्नातं स्थितप्रज्ञस्य लक्षणं तस्य लक्ष्यं कामराजः इति यदुच्यते तत्र नातिशयोक्तिः । कथावसाने सर्वे कामराजं स्तुवन्ति–"देवपुरुषः सः, देवपुरुषः सः" इति (पृ–२६)। एतादृशस्य सुचरितस्य जीवितं चारु प्रत्यपादयत् कविः

गोपिरेड्डिः लिङ्गमूर्तिश्च कृतज्ञताविनीतौ सौहार्दसंभृतौ च। कामराजे बद्धादरोऽपि रामनाथः कामराजेन पूर्वं कृतान् उपकारान् विसस्मार । सामान्यलोकरीतिमेवानुरुन्धानः कामराजं वारंवारमक्षिणोत् सः वाग्भिः ।

कामराजस्य मनसः तत्त्वं दर्पणे इव अस्मिन् संवादे प्रतिबिम्बितं विराजते—

माधवशर्मा :—

"अवाञ्छनीया खलु स्वविषयव्याघातिनी परोपकारप्रवृत्तिः"

गोपिरेड्डि :—

"सत्यमेवेदम् । किन्तु दुस्त्यजा खलु प्रकृतिर्नाम ।"

रूपकस्यान्ते "सर्वे जनाः सुखिनो भवन्तु" इति व्याहरन् मनःशान्त्यै अदृश्यो बभूव कामराजः । इदं चादृश्यत्वं मरणाद्

वा उत स्थानान्तरगमनाद् वा इति प्रश्नस्य समाहितिः प्रेक्षकाणां निर्णयप्रतिभामेवावलम्बते ।

रूपकनायकः कामराजः रङ्गस्थले न दृश्यते एव । स्त्रीपात्राणामप्यत्र रूपके निवेशो न कृतः । भाग्यनगरविजयवाडयोः इदानींतनस्य समाजमध्यमवर्गस्य वृत्तमत्र निपुणं प्रकाशितम् ।

साहित्यं सदा नवनवप्रयोगानपेक्षते । इदं च रूपकमेतः-च्चिरन्तनं सत्यं द्रढयतीति सम्यक् प्रतिभाति ।

अत्र संस्कृतं व्यवहारव्याहार मनुधावति सुगमतया इति कापि हारिता अस्य रूपकस्य । क्वचित् क्वचित् आन्ध्रप्रदेश-लोकोक्तीरपि अस्य कवेः वाक् सुष्ठु अनुसरति "स्वजिह्वामुत्पा" टयितुं वा इच्छेत् कामराजः" (पृ-३) । अनेन संस्कृतान्ध्रविज्ञेन रूपककारेण प्रमाणशब्दः शपथार्थे प्रयुक्तः-"दास्यामीति प्रमाण-मकरोत्" (पृ. २३) इदं च किमपि कामनीयक मेव ।

अद्यत्वे संस्कृतप्रचाराय एतादृशानि रूपकाणि महदुप-कुर्वन्ति इति नातिशयवचः ।

रुचिरमिदं रूपकं सहृदयानां मोदाय कल्पते इति आशास्महे।
इति शम्।

डा. वि. आर्. शास्त्री
प्राध्यापकः, अध्यक्षश्च
संस्कृत विभागः
उस्मानिया विश्वविद्यालयः

हैदराबाद्,
७-९-१९७८

## कृतज्ञताञ्जलिः

अस्य रूपकस्य प्रकाशने प्रकारान्तरेण श्री. जि. पुल्लारेड्डि महोदयानां (Specialist in Pure ghee sweets) प्रोत्साहः वर्तते। सकलसद्गुणराशिभ्यः तेभ्यः कृतज्ञतां प्रकटयन् भगवान् नटराजः तेभ्यः समस्तसन्मङ्गलानि तनोतु इति प्रार्थये।

प्रस्तुत्या मां अनुगृहीतवद्भ्यः डॉ. बि. आर्. शास्त्रिमहोदयेभ्यः, आशीः प्रसादेन कृतार्थयद्भ्यः श्री हरि लक्ष्मीनरसिंह शर्ममहोदयेभ्यश्च समर्पयामि नमांसि भूयांसि।

संस्कृत थियेटर्-संस्थया प्रकाशयितुं अङ्गीकृतवद्भ्यः थियेटर्-स्थापक सदस्येभ्यः श्रीयुतेभ्यः मुट्नूरि राधाकृष्ण मूर्ति-पोतराजु आन्जनेयशर्मा-चल्ला धर्मप्रसाद्-चिवुकुल रामकृष्ण-के. वि. सुन्दराचार्य-अम्बडिपूडि पूर्णानन्द शर्मा-मित्र महोदयेभ्यः प्रकटयामि कृतज्ञताः।

प्रकाशनकार्ये मम सहायभूतेभ्यः श्री चलमचर्ल वेङ्कट शेषाचार्य महोदयेभ्यः, इत्थं रमणीयतया मुद्रितवद्भ्यः दक्षिण भारत प्रेस्-कार्यालयप्रमुखेभ्यः श्री अन्नदानं रामस्वामीमहोदयेभ्यश्च समर्पयामि हार्दिकान् धन्यवादान्।

शैशवे अभ्यस्तसंस्कृतं कृत्वा मां चरितार्थयद्भ्यः मम पितृदेवेभ्यः स्वर्गीय श्री ओगेटि साम्बमूर्ति महोदयेभ्यः संस्कृतविद्या गुरुदेवेभ्यः ब्रह्मश्री चल्ला सत्यनारायण शास्त्रि महोदयेभ्यः,

पूर्वं मम साहित्यरचनाव्यासङ्गस्य प्रथम प्रेरकेभ्यः श्री भंडारु सदाशिवराव्–महोदयेभ्यः (एड्वकेट्, वरङ्गल्) मम भ्रातृभ्यः श्री ओगेटि परिक्षित–शर्मा महोदयेभ्यश्च घटयामि प्रणामाञ्जलीः।

प्रयोगात्मकं (Experimental) रूपकमिदं संस्कृतभाषा नाटककलाभिमानिनां भवतां कृते प्रकटीकरोमि। अस्य गुण-दोष विचारणे सहृदया एव प्रमाणमित्युक्त्वा विरमामि।

भवदीयः

ओगेटि अच्युत रामशास्त्री

विजयदशमी
11 अक्टोबर् 1978

श्रीभरतमुनये नमः

# स्नेह बन्धनम्

## प्रथमं प्रेक्षणकम्

स्थानम्–विजयवाडायां गवर्नर्पेट् सेण्टर्
समयः–प्रातः अष्टवादनवेला

रामनाथः– (स्वगतम्) अमीषु दिवसेषु न दृश्यते कामराजः। बहुवारं लेखं कृत्वा वाचिकं दत्वा प्रहितपुरुषोऽपि नायातः। स मां परिवर्ज्य सञ्चरतीति शङ्का भवति। निर्लज्जः मुखमपि दर्शयितुं न पारयति। इदानीमत्र नास्तीति, हैदराबाद्नगरे निवसतीति च श्रूयते। गान्धीनगरं गत्वा गोपिरेड्डिं मिलित्वा तमधिकृत्य विचारयामि तावत्। (परिक्रम्य विलोक्य) कावेतौ? इत एव आगच्छतः। कथं गोपिरेड्डिः लिङ्गमूर्तिश्च। ... नमः सखिभ्याम्।

उभौ– नमस्ते! कथं वा अत्रागमनम्।

रामनाथः– (गोपिरेड्डिं प्रति) त्वां द्रष्टुं तवैव गृहं प्रस्थितोऽस्मि।

त्वमेवागतोऽसि ममाभिमुखम्। यदा कदा वा किं दृष्टः कामराजः ?

गोपिरेड्डिः— न कदापि। तं दृष्टवतः मम पञ्चषा मासा गता भवेयुः। स सम्प्रति हैदराबाद्नगरे निवसतीति प्रह्वः तस्य कश्चन बन्धुरवदत्। किमस्ति किञ्चित् कार्यं तेन ?

रामनाथः— कथं वा न वर्तेत ? बहुवारमाकारितोऽपि नागतः सः। मां परिवर्ज्य सञ्चरति विकत्थनः।

गोपिरेड्डिः— वयस्य ! मा मैवं भण। न तादृशः पुरुषः कामराजः। कुतो वा त्वां परिवर्ज्य सञ्चरति सः ?

रामनाथः— सखे ! प्रथमं विस्रम्भं जनयन्ति केचन लोके। अतिक्रामत्सु दिनेषु तेषां प्रकृतिः स्वयमेव बहिर्गता भवति।

गोपिरेड्डिः— किमाचरितं तेन ?

रामनाथः— अतिकष्टदशायां मदुपकारं प्राप्य अनन्तरं सानुशयमामकरोत् सः। सज्जन इति, बाल्यात् प्रभृति सख इति च मत्वा ··· (अर्धोक्ते)

गोपिरेड्डिः— हन्त ! ब्रूहि। किं वा अकार्यमाचरितं तेन ? अद्याहं नगरं गच्छामि। तत्र यत्र कुत्र वा यथा कथंचिदपि तं मिलित्वा प्रक्ष्यामि तावत्।

रामनाथः– तर्हि कुरु मे प्रियम् । तमेवं वद–'रामनाथः त्वां कृतघ्नं मनुते । सत्वरमेवात्रागत्य व्यवहारस्य परिष्कारः क्रियताम् । नो चेत् विषमा परिस्थितिः सम्पद्येत' इति ।

गोपिरेड्डिः– किं ते धनं धारयति सः ?

रामनाथः– पत्नी रोगग्रस्तेत्युक्त्वा त्रीणि शतान्यगृह्णात् । पञ्चषा मासा व्यतीताः । अद्यावधि न संमुखमायात', न पुनः प्रेषितानि रूप्यकाणि ।

गोपिरेड्डिः– (साश्चर्यम्) त्रीणि शतानि ! त्रीणिशतानि धारयति ते कामराजः ! लिङ्गमूर्ते ! श्रुतं किम् ?

लिङ्गमूर्तिः– श्रुतं श्रुतम् । किन्तु नात्र मे विश्वासः । किमिति चेत्, स्वजिह्वामुत्पाटयितुं वा इच्छेत्, कामराजः । किन्तु न कदापि कस्मादपि ऋणं गृह्णातीति मे वितर्कः ।

गोपिरेड्डिः– निपुणमभिहितम् । आबाल्यादहमपि जानामि तम् । अतिनिकृष्टदशायामपि न कस्मादपि ऋणमगृह्णात् सः ।

लिङ्गमूर्तिः–(साभिप्रायं रामनाथं पश्यन्) प्रायः वयमेव त्रीणि वा चत्वारि वा तस्मादगृह्णीम ।

रामनाथः— सत्यमेवैतत् । अत एव अद्यावधि तूष्णीमासम् । निदर्शनमप्यस्ति लिखितपत्रं मत्सकाशे । ततः पूर्वं न कदापि पृष्टवानिति मत्वा सपदि दत्तानि रूप्यकाणि । किन्तु विश्वासऋणमेवमवसीयते तेन ।

गोपिरेड्डिः— बहुकृत्वः मामुपागतः कामराजः । किन्तु न कदापि मुखं व्यादाय भणितमेतत्तेन ।

लिङ्गमूर्तिः— मानधनः सः । न कथयति कस्मा अपि स्वीयबाधाम् ।

गोपिरेड्डिः— लिङ्गमूर्ते ! अपि जानासि त्वं कथं वा वर्तते तस्य पत्न्याः स्वास्थ्यम् इति ?

लिङ्गमूर्तिः— वैद्यशालायां प्रवेशितेति प्रपूर्वेद्युः तस्याः मातुलोऽवदत् ।

गोपिरेड्डि :— हन्त ! महत् कष्टमापतितं तस्य ।

लिङ्गमूर्तिः— अद्य नगरं व्रजसि खलु ! तत्र कामराजं मिलित्वा सर्वं ज्ञात्वा प्रतिनिवर्तस्व ।

रामनाथः— गोपिरेड्डे ! तमेवं स्पष्टं वद-'अद्य यावत् वयस्यभावेन रामः तूष्णीमासीत् । कृतघ्नता न सज्जनलक्षणम् । पञ्चदशदिनाभ्यन्तरेषु अत्रागत्य व्यवहारः यदि न परिसमाप्यते तर्हि न्यायस्थाने'..... (अर्धोक्ते)

गोपिरेड्डिः- रामनाथ ! निगृह्यतामाक्रोशः। अल्पस्य ऋणस्य कृते आबाल्यादागतं स्नेहबन्धं मा छिन्धि।

रामनाथः- अयि न शक्नोमि वहु भाषितुम्। न कोऽपि जानाति मम कष्टम्। कतिपयदिनेभ्यः प्राक् मम पत्नी मोटार्कार् दुर्घटनायां क्षतेति ज्ञायत एव भवद्भ्याम्। तदारभ्य प्रभूतं धनं व्ययितम्। यदन्येभ्यः मया दातव्यं धनं तन्मम हस्तान्निर्गच्छत्येव। परमन्यैः मह्यं दातव्यं न तु मम हस्तं प्राप्नोति। कियत्कालं सहेऽहम् ? यथाशक्ति प्रयतेतां तावद्भवन्तौ समस्या-परिष्काराय। गच्छाम्यहम्। (रुष्टो निष्क्रामति)

गोपिरेड्डिः- राम ! तिष्ठ ! तिष्ठ ! .... (निर्विण्णः) लिङ्ग-मूर्ते ! पश्य, कथं वा रुष्टो व्रजति रामः। किं नु नाम कर्तव्यमधुना ?

लिङ्गमूर्तिः- क्रियते किम् ? प्रथमं याहि पत्तनम्। तत्र कामराजं मिलित्वा सर्वं ज्ञात्वा प्रतिनिवर्तस्व। पश्चा-दालोचयावस्तावदनन्तरकरणीयम्

गोपिरेड्डिः- तथैवास्तु। (द्वावपि निवृत्तौ)

## द्वितीयं प्रेक्षणकम्

(हैदराबाद्नगरे, पञ्जगुट्टायां माधवशर्मानामधेयस्य कस्यचिद् वृद्धस्य गृहम्। अत्रैव निवसति कामराजः। विजयवाडादागतः गोपिरेड्डिः सायं सप्तवादनसमये कामराजं द्रष्टुं तस्य गृहं गतः। कामराजः गृहे नासीत्। स तीव्रव्याधिपीडितां स्वकुटुम्बिनीं सत्यवतीं नीत्वा विकाराबाद्नाम्नि जनपदे स्थितायां सर्वकारीयराजयक्ष्मवैद्यशालायां प्रवेशयितुं गतवानासीत्। माधवशर्मा गोपिरेड्डिं सादरमाहूय अतिथिसत्कारमकरोत्। पश्चादुभावप्युपविश्य कामराजमधिकृत्य अन्योन्यं संलपतः।)

गोपिरेड्डिः– तर्हि, आर्य ! कथं वहति सर्वमेतद्व्ययभारं कामराजः ?

माधवशर्मा –वत्स ! आश्चर्यमेवैतत्। सकृदपि वाङ्मात्रेणापि साहाय्यं न याचते। कतिपयदिनेभ्यः प्राक् तस्य शिशुः ज्वरपीडया विसंज्ञः शय्यासंसक्त एवासीत्। तस्मै औषधं क्रेतुं तस्य हस्ते काचोऽपि नासीत्। तथा सति कस्मिंश्चिद्दिने सः रोगग्रस्तायै स्वभार्यायै फलान्याहर्तुं विपणिं गच्छति स्म। तदा मार्गमध्ये कश्चन पूर्वपरिचितः पुरुषः तमुपेत्य किञ्चिदिव द्रव्यसाहाय्यमयाचत। अनुपदमेव तस्मै स्वहस्तस्थितं

एकमात्रं तद्रूप्यकं वितीर्य रिक्तहस्तो गृहं न्यवर्तत कामराजः ।

गोपिरेड्डिः– प्रकृत्या सानुक्रोशः सः, तात ! प्रकृत्या सानुक्रोशः सः । सर्वथा परोपकाराय संकल्पते । किन्तु...

माधवशर्मा–अवाञ्छनीया खलु स्वविषयव्याघातिनी परोपकार-प्रवृत्तिः ।

गोपिरेड्डिः– सत्यमेवेदम् । किन्तु दुस्त्यजा खलु प्रकृतिर्नाम ।

माधवशर्मा–(क्षणं तूष्णीं स्थित्वा) वत्स, किं कथयामि तमधिकृत्य ! प्रत्यहमुषसि चतुर्वादतवेलायां शयनादुत्थाय, सर्वाणि गृहकृत्यानि निर्वर्तयति । अनन्तरं शिशुलालनं पाकक्रियादीनि च परिसमाप्य, वैद्यशालां गत्वा पत्न्यै औषधं समाहरति । ततश्चाध्यापनम् । पश्चात् पत्न्याः परिचर्या । एवमविश्रान्तः तस्य दिनचर्याक्रमः वर्तते ।

गोपिरेड्डिः– एवं सति, अन्ततः तस्यापि स्वास्थ्यं विनश्येत् खलु !

माधवशर्मा–विनश्येदिति किम् ? विनष्टमेव । नक्तंदिवमपरिश्रान्तः अनिद्रश्चेत् कथं नु नाम नष्टं न भवति स्वास्थ्यम् ?

गोपिरेड्डि :– (सोद्वेगम्) किमापतितं तस्य ?

माधवशर्मा–दशदिनेभ्यः प्रभृति कशेरुकाशूलः भवतीति वदति। तदपि बहुवारं पृष्टः सन् अन्ततोऽवदत्।

गोपिरेड्डिः– तर्हि कथं तस्य आजीवः?

माधवशर्मा–उक्तं खल्वध्यापनमिति। प्रतिदिनं पञ्चषा बालकाः तस्य गृहमागच्छन्ति। तानध्याप्य यावद्वेदम् ...(अर्धोक्ते)

गोपिरेड्डिः– कति वा रूप्यकाणि प्राप्नोति?

माधवशर्मा–तस्य शिशोः शिरसि अभ्यञ्जनाय एरण्डतैलस्य कृतेऽपि पर्याप्तं न भवति तत्।

गोपिरेड्डिः– (सविषादं निश्वस्य) हन्त! तादृशः पुरुषः अद्यैवं संवृत्तः!

माधवशर्मा–तस्मै किञ्चिदिव धनसाहाय्यं कर्तव्यमित्यस्ति मे मनसि। किन्तु न गृह्णाति खलु। बहुधा संप्रार्थितोऽपि न शृणोति। प्रत्युत एवं वदति 'ऋणपङ्के निमग्नः पुरुषः न पुनर्बहिरागच्छेत्। एष कामराजः यथाशक्ति उपकारं करोति; न पुनः हस्तं प्रसारयति कस्यचिदपि संमुखे। यदनुभूतं पुरा तदेवालमिति।' वत्स! ज्ञातुमिच्छामि, आबाल्यात्तस्य आप्तमित्रं खलु भवान्? किं विशिष्य जानासि किञ्चित् तमधिकृत्य?

गोपिरेड्डिः— जानामि, तात ! जानामि । अत एव खल्वागतोऽस्मि । आदित एतादृश्येव तस्य परिपाटी ।

माधवशर्मा—किमादितः एवमेव ?

गोपिरेड्डिः—आम्, भणामि, शृणोतु भवान् । गतवर्षे आषाढमासे, मे श्वश्रूः अकस्मादस्वस्थेति तन्त्रीवार्ता समागता । सपदि गन्तुं मम हस्ते रूप्यकमपि नासीत् । अहमपि प्रभुत्वकार्यालये कश्चन साधारणः लेखक एव खलु । मासान्तदिनेषु मादृशस्य हस्ते धनस्थितिः असंभाव्या ननु । किंकर्तव्यताविमूढः सन् कामराजमुपसृत्य व्यज्ञापयम् । किं वदामि, धूमशकटप्रस्थानवेलाभ्यन्तर एव अकस्मादागत्य रूप्यकशतं प्रायच्छत् सः । पञ्चषमासेभ्यः पश्चात् ज्ञातं मया, यत् स्वभार्यायाः कण्ठहारं कस्यचित् मार्वाडीसमीपे न्यासीकृत्य आनीतवान् रूप्यकाणीति । तात ! त्रपा भवति वक्तुं, मम पत्न्याः अपि अस्ति कश्चन हारः, किन्तु....अलमत्युक्त्वा...कामराजः तानि रूप्यकाणि प्रत्यर्पयेति न कदाप्यर्थितवान् । अहमेव कालक्रमेण ऋणविमुक्तोऽभवम् ।

माधवशर्मा – आश्चर्यकारिणी तस्य प्रवृत्तिः ।

गोपिरेड्डि :– (घटिकायन्त्रं दृष्ट्वा) आर्य, अतीतः समयः । अद्य कामराजस्यागमनं अनिश्चितमिव दृश्यते ।

गच्छामि तावत् । आगामिनि सप्ताहे पुनरागमिष्यामीति मन्ये । तदा तमवश्यं मिलित्वैव गमिष्यामि । , दीयतामेतानि पञ्चाशत् रूप्यकाणि तस्मै ।

माधवशर्मा–न गृह्णाति, वत्स ! न गृह्णाति सः । जानासि खलु तस्य प्रकृतिम् ?

गोपिरेड्डि :– जानामि तात, जानामि । जानामि च तस्य मयि गौरवम् । मया दत्तानीति ब्रूहि । अवश्यं गृह्णाति । (रूप्यकाणि ददाति)

माधवशर्मा– अस्तु । (गृह्णाति)

गोपिरेड्डि :– आर्य, कुरुष्व साहाय्यमपरम् । अयं मे गृहसङ्केतः । यद्यावश्यकं भवति विसृज्यतां लेखः । (गृहसङ्केतं ददाति)

माधवशर्मा– तथैव । (गुह्णाति)

गोपिरेड्डिः– (उत्थाय, कतिचित् पदानि गत्वा, स्वगतम्) कामराजं स्मृत्वा हृदयं मे द्रवति । अत्र एकाकी सन बाधामयं जीवितं यापयति सः । घण्टात्रयं प्रतीक्ष्यापि तमदृष्ट्वैव प्रतिनिवृत्तोऽस्मीति खिद्यामि । न जानामि कथं वा एषः रामनाथस्य ऋणान्मोचयितव्यः इति । निष्करुणः खलु रामः । नवतीत-

हृदय कामराजे कटुतां प्रकटयति । ग्रामं गत्वा, कथं वा रामः समाधातव्य इति उद्विग्नं मे मनः । धूमशकटप्रस्थानवेला भवति । त्वरितगत्या गच्छामि तावत् (निष्कान्तः)

## तृतीयं प्रेक्षणकम्

(विजयवाडायां सत्यनारायणपुर्यां लिङ्गमूर्तेर्गृहम्। सायंकाले प्रभुत्वकार्यालयादागत्य उपाश्यवहारं कृत्वा आसने उपविष्टः आस्ते लिङ्गमूर्तिः)

लिङ्गमूर्तिः– (स्वगतम्) कथं चिरयति गोपिरेड्डिः! पत्तनात् प्रत्यागतो वा न वेति तर्कयामि। नन्वागत एव सः। (प्रकाशम्) वयस्य, शतं जीव शरदाम्। अधुनैव स्मरामि त्वाम्। एतदन्तरे आगतोऽसि।

गोपिरेड्डिः– प्रातरेव प्रतिनिवृत्तोऽहं पत्तनात्। कार्यालये निर्विरामं कार्यमवर्तत। अत एव एतावत्पर्यन्तं नागतोऽस्मि।

लिङ्गमूर्तिः– भवतु नाम। किमुक्तं कामराजेन? अपि कुशली सः? कथं वा वर्तते तस्य पत्न्याः स्वास्थ्यम्?

गोपिरेड्डिः– मुहूर्तं तावत्तिष्ठ। (जलं पीत्वा) तस्य पत्नी शय्यागता कण्ठगतप्राणा घटिकाः गणयति। अद्य वा श्वो वा न ज्ञायते।

लिङ्गमूर्तिः– शान्तं पापम्। तत् कथमेष विपर्ययः?

गोपिरेड्डिः— किं कथयामि, स मन्दभाग्यः। किन्तु पर्वत इव निश्चलः। आत्मनः प्राणव्ययेनापि पत्न्याः प्राणावने कृतनिश्चयः सः।

लिङ्गमूर्तिः— किमत्राश्चर्यम्! यदन्येभ्यः एव स्वप्राणान् पणं निक्षिपति सः। तर्हि किमु वक्तव्यं स्वजीवनसखी-विषये। ततस्ततः।

गोपिरेड्डिः— अतिघोरं दारिद्र्यमनुभवति। प्रत्यहमाचरति उप वासव्रतम्। जीवनभृतिसम्पादनार्थं अतिमात्रं क्लेश-यति शरीरम्। किं बहुना, शुष्कीभूतदेहः सन् उपमृत्यु तिष्ठति।

लिङ्गमूर्तिः— आः कष्टम्। तर्हि 'अत्रागच्छेति' नोक्तं भवता?

गोपिरेड्डिः— न दृष्टः खलु मया सः।

लिङ्गमूर्तिः— न दृष्टः? किमदृष्टैव प्रत्यागतः?

गोपिरेड्डिः— अथ किम्।

लिङ्गमूर्तिः— कथम्?

गोपिरेड्डिः— श्रूयतां तावत्। कामराजः तीव्रव्याधिपीडितां स्वपत्नीं सत्यवतीं नीत्वा विकाराबाद्नाम्नि जनपदे स्थितायां सर्वकारीयराजयक्ष्मवैद्यशालायां प्रवेशयितुं गतवानासीत्। तस्य आगमनमनिश्चितमिति तस्य

गृहस्वामिना माधवशर्ममहोदयेन भणितम् । तथापि, रात्रौ सप्तवादनसमयात् प्रभृति दशवादनपर्यन्तं तत्रैव स्थित्वा, कामराजं प्रतीक्ष्य, प्रतीक्ष्य, अन्ततः आयस्तः सन्, मद्वचनादुच्यतामिति वक्तव्यमुक्तवा धूमशकट-वेलातिक्रमणभयेन तमदृष्ट्वैव प्रत्यागतोऽस्मि ।

लिङ्गमूर्तिः— तर्हि को वा उपायः कामराजं रामनाथस्य ऋणान्मोचयितुम् ? इतः त्वद्गमनानन्तरं अयं तं पुनः-पुनः बहुधा निन्दितवान् ।

गोपिरेड्डिः— किं किमिति ?

लिङ्गमूर्तिः— वञ्चक इति, स्तेन इति, तीर्थकाक इव जीवितं धारयतीति, भिक्षुको भूत्वा गृहाद् गृहमटन् ममापि गृहप्राङ्गणे तिष्ठति चेत् पूर्वस्नेहं पुरस्कृत्य मुष्टिमात्रं कवलं पातयामीति; किं कथ्यते किं किं न प्रलपितं तेन । सर्वं श्रुत्वाऽपि तुष्णीमासम् ।

गोपिरेड्डिः— प्रलपतु, प्रलपतु । कथं वा न प्रलपति । न स्मरति आत्मनः विद्यार्थिजीवितम् । यदा स पाठशालायां पठति स्म तदा एकदा किमभवत् ? कस्मिंश्चिद्दिने आम्रवनं प्रविश्य अनेन फलानि लूनानीति वन-पालकः एनमाकृष्य प्रहर्तुमुद्यतोऽभवत् । तदा कामराजः आगत्य फलानि मया लूनानीत्युक्त्वा अपराधमात्मन्यारोप्य प्रहरणानि स्वयमनुभूय राम-नाथममोचयत् । स्मरसि कच्चित् ?

लिङ्गमूर्तिः– स्मरामि, स्मरामि। कलाशालाध्ययनदिनेष्वपि संवृत्तं वृत्तमपि स्मरामि। स्वसहपाठिनीं तां शकुन्तलां दृष्ट्वा यदासौ कामोन्मत्तः अभवत् तदा महान् कलहः संजातः। तदानीं कामराजः पुरतः स्थित्वा स्वबुद्धिचातुर्येण विवादस्य परिष्कारं नाकरिष्यत् चेत् अवश्यं रक्तपातोऽभविष्यत् ननु।

गोपिरेड्डिः– व्यतीतं सर्वं विस्मरति रामनाथः। अत्रापरं च स्मरामि। आत्मनः स्वसुः विवाहसमये निर्णीतस्य वरशुल्कस्य किञ्चिदूनत्वात् विवाहे स्थगिते सति, कामराज एव खलु सर्वं सम्यक् परिष्कृत्य विवाहमङ्गलं निर्विघ्नमकारयत्?

लिङ्गमूर्तिः– यदासौ व्याधिग्रस्तोऽभवत् तदा कामराज एव खलु अहोरात्रं तस्य परिचर्यां कृत्वा जीविते हताः तमुज्जीवितमकरोत्।

गोपिरेड्डिः– किं बहुना, यथाकालं, यथाशक्ति, यथाविधि, यद्यत् कर्तव्यं तत्तदकरोत् कामराजः रामनाथाय।

लिङ्गमूर्तिः– सम्प्रति सर्वमेतदूषरे वर्षणमिव निरर्थकं संजातम्। आवामेव येन केनाप्युपायेन अस्य ऋणस्य निर्यातनं कृत्वा कामराजस्य साहाय्यं करवाव।

गोपिरेड्डिः– मासस्य प्रथमदिवसे वेतनं गृहीत्वा रामनाथस्य शिरसि पातयिष्यावस्तावत्।

लिङ्गमूर्तिः– एहि, साधयावस्तावत्। (निष्क्रान्तौ)

–०–

## चतुर्थं प्रेक्षणकम्

(लिङ्गमूर्तेर्गृहम्। स दिनपत्रिकां पठन्नास्ते। रामनाथः प्रविश्य तस्य पार्श्वे उपविशन्)

रामनाथः– ननूक्तं खलु मया, यथा, तादृशाः प्राणिनस्तथैव प्रवर्तन्ते। 'उडुपेन नदीं तीर्त्वा उडुपं दाहयन्ति केचन लोके' इति लोकोक्तिमनुसृत्य स्वकार्य-साधनानन्तरं कामराजोऽपि·····(अर्धोक्ते)

लिङ्गमूर्तिः– सखे। मैवं वादीः। अज्ञातं किमस्ति तव। कण्ठ-दघ्नं कष्टेषु निमग्नः कामराजः। जीविते अद्यावधि ईषदपि अननुभूतदूषणः सः। परिभवादपि वरं मनुते मरणम्। विना निद्राहारौ शल्यावशिष्ट-शरीरः वर्तते इति गोपिरेड्डिरवदत्। त्वं किमपि मनसि कृत्वा मा स्म कोपं गमः। रामनाथ! तव ऋणनिर्यातनं न भवतीति शङ्का व्यपैतु।

(हस्ते लेखं गृहीत्वा सविषादं ससंभ्रमं च प्रविशति गोपिरेड्डिः। लिङ्गमूर्तिरामनाथयोः संभाषणं श्रुत्वा स्तब्धः सन् तत्रैव अन्तर्हितस्तिष्ठति।)

रामनाथः– अयि। परोपदेशवेलायां सर्वेऽपि शिष्टा एव भवन्ति।

मम स्थाने त्वं भवसि चेत् जानीथाः । कामराजः न केवलं युवयोरेव मित्रं, ममापि खलु । श्रुणु तावत्- मम पत्नी मोटार्कारदुर्घटनायां क्षतेति, चिकित्सालये प्रवेशितेति च ज्ञात्वापि द्रष्टुं नागतः सः । तथा सति दुर्घटनासमये तत्र सन्निहितः यः कश्चन मार्ग-गामी महाशयः तां चिकित्सालये प्रवेश्य अवितर्कितं साहाय्यमकरोत् । संप्रति, स्नेहो नाम किं वा वद !

लिङ्गमूर्ति :- अविज्ञातं स्यात् कामराजस्य ।

रामनाथ :- विज्ञातमेव किल, तस्य गृहस्वामी स वृद्धः अवोच-दिति श्रुतं मया ।

लिङ्गमूर्तिः- तर्हि कार्यान्तरव्यग्रेण तेन भवितव्यम् ।

रामनाथ :- अयि, किमिति मुधा समर्थयसि तम् ?

लिङ्गमूर्तिः- राम, अनालोच्य मा कुरु निर्णयम् । गोपिरेड्डिनापि नगरे न दृष्टः कामराज इत्येतेनैव ज्ञायते स कियतीं बाधामनुभवति स्मेति ।

रामनाथ :- का वार्ता बाधायास्तस्य ? किं कलत्राय औषधं न दाप्यते तेन । किं मासे मासे गृहभाटकं न दीयते ? किं प्रतिदिनमशनं न क्रियते ? वद किं किं वा न परिसमाप्यते तेन? केवलं मम ऋणविषये एव आपतति किं बाधा ?

गोपिरेड्डि :– (रामनाथस्य दूषणवाक्यानि शृणोति। रक्तं भवति तस्य मुखम्। नेत्रे च अश्रुपूर्णे भवतः। सहसा तयोर्मध्ये आगत्य साक्रोशं सकम्पं च वदति) रामनाथ ! पश्यैतत् पत्रम्। पत्तनादागतम्। कामराजस्य गृहस्वामिना लिखितम्। पठ्यतां तावत्। (इति तस्य हस्ते निक्षिपति)

लिङ्गमूर्ति :– (सोद्वेगम्) देह्येनत्। त्वरते मे हृदयमस्य वाचनाय। (रामनाथस्य हस्तात् लेखं गृह्णाति वाचयति च)

'गोपिरेड्डिमाशीःकृत्य माधवशर्मा निवेदयति। वत्स ! इतः त्वद्गमनानन्तरमत्र स्थितिः अतीव विषादपूर्णा संवृत्ता। कामराजस्य पत्नी सत्यवती-दिनदिनप्रवृद्धेन राजयक्ष्मरोगेण नरकयातनामनुभूयानुभूय ग्रह्याः, बुधवासरे रात्रौ द्वादशवादनसमये पञ्चत्वं गतेति लिखितुं खिद्यति मे हृदयम् (मध्य वाचनाद्विरम्य) हन्त ! अतीव दारुणं खलु संवृत्तम्।

रामनाथ :– आः कष्टम् !

गोपिरेड्डि :– (मौनेन अश्रूणि विमुञ्चति)

लिङ्गमूर्ति :– (पुनर्वाचयति)

'तदारभ्य दुरूहः परिणामः संवृत्तः कामराजे। निराहारः सन्, मूकीभूय, इतस्ततः परिभ्रमति।

तस्य शिशुं प्रातिवेशिकः कश्चन गृहस्थः पुत्रभावेन स्वीकृत्य पोषयति। तस्यापि पुरुषसन्ततिर्नास्ति किल। अहं तस्य किमपि नास्मि। केवलं परिचितः। तस्य सर्वेऽपि बान्धवाः मित्राणि च दूरे वर्तन्ते। अहं सर्वमेतत् विमृश्य 'स्वग्रामं गत्वा तत्रैव कालं यापये' ति पुनः पुनः कामराजमवदम्।' (मध्ये पुनर्वाचनं विरम्य) उचितमुक्तं वृद्धेन।

गोपिरेड्डि :– ममाप्ययमेवाशयः। किन्तु .....

लिङ्गमूर्ति :– किमतः परम्। स नायातीति ते वितर्कः ?

गोपिरेड्डि :– आम्।

लिङ्गमूर्ति :– कथं पुनर्नायाति ? त्वं तत्र गत्वा येन केनाप्युपायेन तमत्रानय। (साभिप्रायं रामनाथं पश्यति)

रामनाथ :– (निर्विकारं) तथैवास्तु।

लिङ्गमूर्ति :– (पुनर्वाचयति लेखम्)।

'स्वग्रामं गत्वा तत्रैव कालं यापयेति पुनः पुनः कामराजमवदम्। नोचेत्, अत्र एकाकी सन् क्रमेण उन्मत्तो भविष्यतीति बिभेति मे मनः। कामराजोऽपि 'यास्यामि तात, यास्यामि, यातव्यमित्येव मतिर्वर्तते। अस्मिन्नेव जन्मनि अवश्यं यास्यामीति, जीवितनिरपेक्षः सन् प्रयच्छति प्रतिवचनम्। प्रह्वः

प्रभृति तीव्रज्वरेण शय्यागत एवास्ते। विसंज्ञायां त्रिचतुर्वारं 'ऋणबाधा ऋणबाधेति' शनैश्शनैरव्यक्तमालपत्। वत्स! तादृशस्यापि धर्मराजस्य ऋणबाधा अस्तीति श्रुत्वा आश्चर्यं भवति मे। अनुपदमेव भवान् अत्रागत्य तस्मिन् श्रद्धालुर्न भवेच्चेत् तस्य दशा नितरां शोचनीया सम्पत्स्यते। अविलम्बितमागम्यताम्।'

एवं

भवदीयः माधवशर्मा

गोपिरेड्डि :– रामनाथ! किमाकर्णितम्? एतदेव खलु पापं कृतं कामराजेन। तस्य मनसि तव ऋणस्य निर्यातनं न कार्यमिति दुर्भावना अस्ति किं वद? अहमधुनैव प्रस्थितो भवामि पत्तनाय। तव ऋणमचिरमेव निश्शेषमहमेव निर्यातयिष्यामि। मा भैषीः।

लिङ्गमूर्ति :– अहमप्यनुगच्छामि त्वाम्।

रामनाथ :– अहमप्यनुसरामि युवाम्।

गोपिरेड्डि :–<br>लिङ्गमूर्ति :– } (साश्चर्यम्) बाढम्। प्रथमः कल्पः।

(सर्वे निष्क्रान्ताः)

## पञ्चमं प्रेक्षणकम्

(पट्टणे माधवशर्मणः गृहम् । सः गीतां पठन्नास्ते)

माधवशर्मा–अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ।।

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः
मय्यर्पितमनोबुद्धिः यो मद्भक्तः स मे प्रियः ।।

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैः मुक्तो यस्स च मे प्रियः ।।

अनपेक्षः शुचिर्दक्षः उदासीनो गतव्यथः ।।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ।।

यो न हृष्यति न द्वेष्टि, न शोचति न कांक्षति ।
शुभाशुभपरित्यागी भक्तिमान् यस्स मे प्रियः ।।

समश्शत्रौ च मित्रे च तथा मानावमानयोः ।
शीतोष्णसुखदुःखेषु समस्संगविवर्जितः ।।

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिः भक्तिमान् मे प्रियो नरः ।।

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमाः भक्तस्तेऽतीव मे प्रियाः ॥

(कामराजः वृद्धस्य स्मृतिपथमागतः । तस्य नेत्रे अश्रुपूर्णे भवतः । (क्षणं स्थित्वा) सर्वथा एतादृशलक्षणलक्षितः कामराजः स भगवतोऽतीव प्रिय इति मन्ये । वत्स, कामराज!

गोपिरेड्डिः- (लिङ्गमूर्तिरामनाथाभ्यां सह प्रविश्य ससंभ्रमं सविषादं च) आर्य ! कुत्र कामराजः ?

माधवशर्मा – अये, कथं गोपिरेड्डिः ! मित्रे च !

गोपिरेड्डिः– (सोद्वेगम्) तात ! कुत्र कामराजः !

लिङ्गमूर्तिः-
रामनाथः– } अपि कुशली सः ?

माधवशर्मा – (सविषादं विहस्य) कुत्र कामराजः ? अपि कुशली सः ? वत्साः ! प्रथममुपविशन्तु भवन्तः । सर्वं कथयामि ।

सर्वे:– (उपविश्य सोद्वेगं माधवशर्मणः मुखमालोकयन्तः) आर्य !

माधवशर्मा – वत्साः ! महान् विचित्रः प्राणी खलु कामराजः ! तादृशं पुरुषं लोके कुत्रापि नापश्यम् । किं कथयामि ? अकस्माददृश्योऽभूत् सः ।

सर्वे :- किमदृश्योऽभूत् ! कदा ?

माधवशर्मा – प्रह्यः ! तस्यान्वेषणे अतिमात्रं व्यापृतोऽपि कृतार्थो नाभवम् ।

गोपिरेड्डिः– स इत्थं खेदयति सर्वान्नः ।

माधवशर्मा – प्रह्यः, सायन्तने, ज्वरे एव मामाहूय पार्श्वे उपवेश्य वृत्तान्तमेतदकथयत् ।

सर्वेः– कः सः ?

माधवशर्मा – तस्य यो वा कश्चन मित्रमस्ति किल । कामराजः तस्मात् पत्रसाक्षिकं शतत्रयं ऋणं गृहीत्वा द्वित्रमासेषु दास्यामीतिप्रमाणमकरोत् किल । ... .... (अर्धोक्ते)

लिङ्गमूर्तिः– (रामनाथं पश्यन्) ज्ञातमेवैतत् ।

माधवशर्मा – जानन्ति खलु भवन्तः कामराजस्य स्वभावम् ? तदारभ्य स्ववचनपालने दत्तदृष्टिः सः नितरां व्यग्रोऽभवत् । एकतो बालकानध्यापयन् रात्रौ द्वयोर्वणिजोः समीपे आयव्ययादिकं च लिखन् अन्यतः कलत्रस्यौषधाय धनं व्ययीकुर्वन् यथाशक्ति यथासम्भवं च तदृणनिर्यातनार्थं त्रिशतं धनं समचिनोत् सः । किन्तु ..... (अर्धोक्ते)

रामनाथ :- किन्तु, किमासीत् ?

माधवशर्मा – दैवदुर्लिपिस्तदन्यथाऽकल्पयत् ।

लिङ्गमूर्ति :- कथं नाम ?

माधवशर्मा – कस्मिंश्चिद्दिने स भार्यायै औषधं गृहीत्वा वैद्यशालायाः स्वगृहं प्रति प्रतिनिवर्तमान आसीत् । तदा मार्गमध्ये, विरुद्धदिशा आगच्छन्ती काचन लारी (Lorry) सव्यमागच्छन्तं कञ्चन मोटार्कारं अघट्टयत् । तं मोटार्कारमाश्रित्य आगच्छन्ती काचन महिला स्वशिशुना सह अधः पतित्वा तीव्रं क्षता विसंज्ञा अभवत् । तदा तत्र सन्निहितः कामराजः जटिति तां महिलां कस्मिंश्चित् टाक्सीशकटे निक्षिप्य चिकित्सालयं नीत्वा तत्र प्रावेशयत् ।

रामनाथ :- (स्वगतम्) सा किं मम पत्नी स्यात् ?

गोपिरेड्डि :- दयालुः सः, तात ! दयालुः सः । सर्वदा, सर्वथा च परोपकारप्रवणः सः ।

लिङ्गमूर्ति :- (रामनाथं पश्यन्) नहि, नहि, परपीडनपरायणः सः । ततस्ततः ।

माधवशर्मा -अतिगाढं क्षतां, रक्तसिक्तां तामबलां दृष्ट्वा विकलितमनस्कः कामराजः ऋणनिर्यातनार्थं स्वरक्तमांसौ व्ययीकृत्य सञ्चितानि तानि त्रीणि शतानि

रूप्यकाणि भिषजः हस्ते समर्प्य यथाकथंचिदपि मम स्वसुः प्राणान् रक्षन्तु भवन्त इत्यरुदत् किल ! वत्सः, सा ललना न काप्यन्या ! किन्तु तस्य पत्नी किल यस्य ऋणपङ्क्ष्यं पतितः ।

रामनाथ :– हन्त, तर्हि किमिति नोक्तं तेन सर्वमेतत् ? (स्वशिरस्ताडयति)

माधवशर्मा – अहमपि तदेवापृच्छम् ।

लिङ्गमूर्ति :– किमुक्तं तेन ?

माधवशर्मा – एवमुक्तम् "धनं नाम कियत्, तात । धनं नाम कियत् ? एष कामराजः मधुरवचनं मधुरहृदयं च कांक्षते । ममाप्तमित्रस्य रामनाथस्त कृते बाल्यात् प्रभुति कति वा कष्टानि नानुभूतानि मया ? स सर्वदा सुखी भूयात् । मम समक्षं स कष्टेषु निमग्नश्तेत् धनस्य गणनां कुर्वन् 'अयि ! त्वकृते, इयद्धनं व्ययीकृतं मया, तत् प्रतियच्छेति एष कामराजः न पृच्छति । पृष्ट्वा न जीवति चेति ।

गोपिरेड्डि :– अन्यादृशी खलु तस्य स्नेहप्रवृत्तिः ।

लिङ्गमूर्ति :– ततस्ततः ।

माधवशर्मा – ततः स्वशीर्षोपधानस्य अधस्तान्निक्षिप्तं धनमुद्धृत्य मम हस्ते निक्षिप्य एवमवदत् 'आर्य ! गृहाणैतानि

त्रीणि शतानि रूप्यकाणि । प्रेषय मे रामनाथस्य । अहं कुशली इति लिख । गोपिरेड्डि-लिङ्गमूर्ति-इत्यादि-मित्रेभ्यः सर्वेभ्यः मम नमस्कारान् वद । अद्यैव तानि रूप्यकाणि मनि आर्डर् अकरवम् ।

सर्वे– देवपुरुषः सः, तात ! देवपुरुषः सः । ततस्ततः ।

माधवशर्मा– अनन्तरं प्रातरुत्थाय अपश्यम् । द्वारमीषदुद्घाटितमासीत् । अभ्यन्तरे प्रविश्य अवालोकयम् । न दृष्टः कामराजः । खट्वायां निक्षिप्तं पत्रमपश्यम् । तस्मिन्नेवं लिखितम्–आर्य ! प्रमाणाः । सर्वेभ्यः बन्धुमित्रेभ्यः समर्पय मे प्रणामान् । एष कामराजः मनःशान्त्यै अदृश्यो भवति । सर्वे जनाः सुखिनो भवन्तु' इति ।

सर्वे– (सविषादं सोद्वेगं च) वयस्य ! कामराज !

(नेपथ्ये)

'अद्वेष्टा सर्वभूतानाम् ' इत्यादिगीताश्लोकाः श्रूयन्ते।

( स्नेहबन्धनं सम्पूर्णम् )

—०—



**ओगेटि अच्युत रामशास्त्री,**
एम. ए., भाषाप्रवीणः

जन्म २ ऑगस्ट १९३२

संस्कृतान्ध्रभाषयोः वक्ता रचयिता परिशोधकश्च ।

"दि संस्कृत थिएटर्" हैदराबाद्, नाटक प्रयोग संस्थायाः स्थापकः (स्थापना 7-4-1970) अध्यक्षः नाटकप्रयोक्ता निर्देशकः नटश्च । रङ्गस्थले प्रदर्शितेषु, तथा आकाशवाणी हैदराबाद् केन्द्रेण प्रसारितेषु च संस्कृतमहानाटकेषु नायक-उपनायक पात्रधारी गानकुशलः महानटः ।

भारत राष्ट्रपति सम्मानितैः श्री गुण्डेराव्-हरकारे महोदयैः "संस्कृत नाटक प्रयोगोद्धारकः" इति बिरुदेन सम्मानितः ।

"संस्कृतनाटकप्रयोगरङ्गः" (चरितम्, आन्ध्रभाषायाम्), "स्नेहबन्धनम्" (रूपकम्) इति पुस्तकद्वयस्य रचयिता

आन्ध्रप्रदेशप्रभुत्वात् "स्टेट्अवार्ड" ग्रहीता उत्तमअध्यापकः ।

अध्यापकः, हिन्दीविद्यालयः, राष्ट्रपति रोड्, सिकिन्दराबाद् आन्ध्रप्रदेश्, भारत् ।

अम्बडिपूडि पूर्णानन्द शर्मा, एम. ए.
सेक्रेटरी
दि संस्कृत थियेटर्, हैदराबाद्